(1092) "फुल्ल विकसने" (I-भ्वादि:-532. अक. सेट्. पर.)
फुल्लक:-ल्लिका, फुल्लक:-ल्लिका, पुफुल्लिषक:-षिका, पोफुल्लक:-ल्लिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचिल्लतिवत् (528) ज्ञेयानि। पचाद्यचि—[A]प्रफुल्ल:।

(1093) "फेल्ट गतौ" (I-भ्वादि:-542. सक. सेट्. पर.)
फेलक:-लिका, फेलक:-लिका, [1]पिफेलिषक:-षिका, [2]पेफेलक:-लिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेलतिवत् (262) ज्ञेयानि। [3]फेला, [B]फेलनम्।

(1094) "बण शब्दार्थ:" (I-भ्वादि:-459. अक. सेट्. पर.) [अ]
बाणक:-णिका, बाणक:-णिका, बिबणिषक:-षिका, बम्बणक:-णिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककणतिवत् (157) ज्ञेयानि। [4]उल्बण:[C]। [5]बाण:, [6]गीर्बाणा:।

---

1. सन्नन्ते द्वित्वे, अभ्यासे, 'ह्रस्व:' (7-4-59) इति ह्रस्व:; स च, 'एच इग्घ्रस्वादेशे' (1-1-48) इति शास्त्रात् एकारस्य इकाररूप:।
2. यङन्ताण्ण्वुलि, अभ्यासस्य ह्रस्वे इकारे, 'गुणो यङ्लुको:' (7-4-82) इति इकारस्य गुणेन एकार इति ज्ञेयम्।
3. 'गुरोश्च हल:' (3-3-103) इति स्त्रियां भावादौ अकारप्रत्यय:। फेला=भुक्तसमुज्झितम्। 'पेला' इति धातुवृत्तौ पाठ:।
4. पचाद्यचि, पृषोदरादित्वात् उलूखलशब्दवत् 'उत्' इत्युपसर्गस्य लत्वे रूपमेवम्।
5. बणति=शब्दं करोत्यस्मिन् बाण:=ज्या। अधिकरणे 'हलश्च' (3-3-121) इति संज्ञायां घञ्।
6. गीरेव बाण: येषां ते गीर्बाणा:= देवा:, भूदेवाश्च।

[अ] धातुरयं माधवधातुवृत्त्यादिषु न दृश्यते। 'भ्रण—' इत्यस्य पाठभेदोऽयम्, इति सि. कौमुदी। क्षीरतरङ्गिण्यां तु धातुरयमुपात्त:। परं तु तत्र वण इति मुद्रणाशुद्धि:। उत्तरत्र बाणशब्दस्यास्मादेव धातोर्निष्पादनात्।

A. 'अधित्यकायामिव धातुमत्यां लोध्रद्रुमं सानुमत: प्रफुल्लम्॥' रघु. 2.29.

B. 'फणीश्वरक्ष्वेलरुषं प्रवेल्लितस्रजं मुहु: पेलववातफेलनात्॥' धा. का. 1.69.

C 'प्रश्लोणितान् प्रेणनविघ्रणक्षितीननुल्बणान् धेनुगणान् क्नतस्तनान्॥'

धा. का. 1. 59.